करमाला निर्णयः

॥७२॥

ॐ श्रीगणेशाय नमः ॥ अथ करमालानिर्णयः ॥ सनत्कुमारसंहितायां ॥ तर्जनी मध्यमानामा कनिष्ठा चेति ताः
क्रमात् ॥ तिस्रोंगुल्यास्त्रिपर्वाणो मध्यमा चैव पर्विका ॥ पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् ॥ अना
मामध्यमारभ्य कनिष्ठादित एव च तर्जनीमूलपर्यंतं दशपर्वसु संजपेत् ॥ अनामातलमारभ्य कनिष्ठा
दित एव च । तर्जनीमूलपर्यंतमष्टपर्वसु संजपेत् ॥ एतद्वचनेन त्वष्टोत्तरशतविषयम् ॥ इति श्रीक्रम
वचनात् ॥ हंसपारमेश्वरे पि ॥ पर्वद्वयमनामायां परिवर्तेन कारयेत् । पर्वत्रयं मध्यमायास्तर्ज
न्येकं समाहरेत् ॥ शक्तिमाला समाख्याता सर्वमंगलदीपिका ॥ अनामामूलमारभ्य प्रदक्षिणक्र
मेण तु । मध्यमामूलपर्यंतं जपेदष्टसु पर्वसु ॥ रुद्रमपि तथैव । मुंडमालातंत्रे ॥ अनामिका
पर्वद्वयं कनिष्ठादिक्रमेण तु तर्जनीमूलपर्यंतं करमाला प्रकीर्तिता ॥ अंगुलीर्न वियुंजी
त किंचिदाकुंचिते तले । अंगुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥ अन्यत्रापि ॥ अंगुल्य
ग्रे च यज्जप्तं यज्जप्तं मेरुलंघनात् पर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ गणनाविधि
मुल्लंघ्य यो जपेत्तज्जपं यतः । गृह्णंति राक्षसास्तेन गणयेत्सर्वथा बुधैः ॥ सनत्कुमारे ॥ क्र
मोत्क्रमगतैर्माला मातृकार्णैस्तु मेरुकैः सबिंदुकैः साष्टवर्गैः रंतर्यजनकर्मणि । आदितः क
चटतपयशाः प्रोक्ता अष्टौ प्रकीर्तिताः ॥ तद्यथा ॥ अकारादीनां वर्णानां कवर्गादीनां चांतिमवर्णं
सानुस्वारं कृत्वा पूर्वमुच्चार्य पश्चान्मंत्रजपः कार्यः । अनेनप्रकारेणाष्टोत्तरशतसंख्यो

श्लो. १५

करमालानिर्णयः पत्र १ नं ७२

करमालानिर्णयः

१५ पत्र

सं. १९३१ वि.

